# ॥वेदान्तसारः

vedāntasāraḥ

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।

आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥

akhaṇḍaṁ saccidānandamavāṅmanasagocaram |
ātmānamakhilādhāramāśraye'bhīṣṭasiddhaye || 1 ||

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।

गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २ ॥

arthato'pyadvayānandānatītadvaitabhānataḥ |
gurūnārādhya vedāntasāraṁ vakṣye yathāmati || 2 ||

वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च ॥ ३ ॥

vedānto nāma upaniṣatpramāṇaṁ tadupakārīṇi śārīrakasūtrādīni ca || 3 ||

अस्य वेदान्तप्रकरणत्वात् तदीयैः एव अनुबन्धैः तद्वत्तासिद्धेः न ते पृथगालोचनीयाः ॥ ४ ॥

asya vedāntaprakaraṇatvāt tadīyaiḥ eva anubandhaiḥ tadvattāsiddheḥ na te pṛthagālocanīyāḥ || 4 ||

तत्र अनुबन्धो नाम अधिकारिविषयसम्बन्धप्रयोजनानि ॥ ५ ॥

tatra anubandho nāma adhikāriviṣayasambandhaprayojanāni || 5 ||

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ॥ ६ ॥

adhikārī tu vidhivadadhītavedavedāṅgatvenāpātato'adhigatākhilavedārtho'smin janmani janmāntare vā kāmyaniṣiddhavarjanapuraḥsaraṁ nityanaimittikaprāyaścittopāsanānuṣṭhānena nirgatanikhilakalmaṣatayā nitāntanirmalasvāntaḥ sādhanacatuṣṭayasampannaḥ pramātā || 6 ||

काम्यानि-- स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ॥ ७ ॥

Kāmyāni-- svargādīṣṭasādhanāni jyotiṣṭomādīni || 7 ||

निषिद्धानि-- नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि ॥ ८ ॥

Niṣiddhāni-- narakādyaniṣṭasādhanāni brāhmaṇahananādīni || 8 ||

नित्यानि-- अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि ॥ ९ ॥

Nityāni-- akaraṇe pratyavāyasādhanāni sandhyāvandanādīni || 9 ||

नैमित्तिकानि--पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि ॥ १० ॥

Naimittikāni-- putrajanmādyanubandhīni jāteṣṭyādīni || 10 ||

प्रायश्चित्तानि -- पापक्ष्यसाधनानि चान्द्रायणादीनि ॥ ११ ॥

Prāyaścittāni-- pāpakṣyasādhanāni cāndrāyaṇādīni || 11 ||

उपासनानि -- सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ॥ १२ ॥

Upāsanāni-- saguṇabrahmaviṣayamānasavyāpārarūpāṇi śāṇḍilyavidyādīni || 12 ||

एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनमुपासनानां तु चित्तैकाग्र्यं "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" (बृ.उ. ४।४।२२) इत्यादिश्रुतेः "तपसा कल्मषं हन्ति" (मनु. १२।१०४) इत्यादिस्मृतेश्च ॥ १३ ॥

eteṣāṁ nityādīnāṁ buddhiśuddhiḥ paraṁ prayojanamupāsanānāṁ tu cittaikāgryaṁ "tametamātmānaṁ vedānuvacanena brāhmaṇā vividiṣanti yajñena" (bṛ. U. 4.4.22) ityādiśruteḥ "tapasā kalmaṣaṁ hanti" (manu. 12.104) ityādismṛteśca || 13 ||

नित्यनैमित्तिकयोः उपासनानां त्ववान्तरफलं पितृलोकसत्यलोकप्राप्तिः "कर्मणा पितृलोकः विद्यया देवलोकः" (बृ. उ. १।५।१६) इत्यादिश्रुतेः ॥ १४ ॥

nityanaimittikayoḥ upāsanānāṁ tvavāntaraphalaṁ pitṛlokasatyalokaprāptiḥ karmaṇā pitṛlokaḥ vidyayā devalokaḥ (bṛ. u. 1.5.16) ityādiśruteḥ || 14 ||

साधनानि - नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसम्पत्ति-मुमुक्षुत्वानि ॥ १५ ॥

sādhanāni nityānityavastuvivekehāmutrārthaphalabhogavirāgaśamādiṣaṭkasampattimumukṣutvāni || 15 ||

नित्यानित्यवस्तुविवेकस्तावद् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् ॥ १६ ॥

nityānityavastuvivekastāvad brahmaiva nityaṁ vastu tato'nyadakhilamanityamiti vivecanam || 16 ||

ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयानित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिः - इहामुत्रार्थफलभोगविरागः ॥ १७ ॥

aihikānāṁ srak candanavanitādiviṣayabhogānāṁ karmajanyatayānityatvavadāmuṣmikāṇāmapyamṛtādiviṣayabhogānām anityatayā tebhyo nitarāṁ viratiḥ -- ihāmutrāarthaphalabhogavirāgaḥ || 17 ||

शमादयस्तु - शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः ॥ १८ ॥

śamādayastu śamadamoparatititikṣāsamādhānaśraddhākhyāḥ || 18 ||

शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः ॥ १९ ॥

śamastāvat śravaṇādivyatiriktaviṣayebhyo manaso nigrahaḥ || 19 ||

दमः - बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् ॥ २० ॥

Damaḥ--bāhyendryāṇāṁ tadvyatiriktaviṣayebhyo nivartanam || 20 ||

निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिरथवा विहितानां कर्मणां विधिना परित्यागः ॥ २१ ॥

nivartitānāmeteṣāṁ tadvyatiriktaviṣayebhya uparamaṇamuparatirathavā vihitānāṁ karmaṇāṁ vidhinā parityāgaḥ || 21 ||

तितिक्षा - शीतोष्णादिद्वन्द्वसहिष्णुता ॥ २२ ॥

Titikṣā-- śītoṣṇādidvandvasahiṣṇutā || 22 ||

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः - समाधानम् ॥ २३ ॥

nigṛhītasya manasaḥ śravaṇādau tadanuguṇaviṣaye ca samādhiḥ -- samādhānam || 23 ||

गुरूपदिष्टवेदान्तवाक्येषु विश्वासः - श्रद्धा ॥ २४ ॥

gurūpadiṣṭavedāntavākyeṣu viśvāsaḥ śraddhā || 24 ||

मुमुक्षुत्वं - मोक्षेच्छा ॥ २५ ॥

mumukṣutvaṁ mokṣecchā || 25 ||

एवम्भूतः प्रमाताधिकारी शान्तो दन्त (बृ उ ४ ।४ ।२३) इत्यादिश्रुतेः । उक्तञ्च

प्रशान्तचित्ताय जितेन्द्रयाय च

प्रहीणदोषाय यथोक्तकारिणे ।

गुणान्विताय्यानुगताय सर्वदा
प्रदेयमेतत् सततं मुमुक्षवे ॥ इति
(उपदेशसाहस्त्री ३२४ ।१६ ।७३) ॥ २६ ॥

evambhūtaḥ pramātādhikārī śānto danta (bṛ u 4|4|23) ityādiśruteḥ | uktañca
praśāntacittāya jitendrayāya ca
prahīṇadoṣāya yathoktakāriṇe |
guṇānvitāyānugatāya sarvadā
pradeyametat satataṁ mumukṣave || iti
(upadeśasāhasrī 324|16|73) || 26 ||

विषयः - जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्र एव वेदान्तानां तात्पर्यात् ॥ २७ ॥

Viṣayaḥ - jīvabrahmaikyaṁ śuddhacaitanyaṁ prameyaṁ tatra eva vedāntānāṁ tātparyāt || 27 ||

संबन्धस्तु - तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः ॥ २८ ॥

sambandhastu - tadaikyaprameyasya tatpratipādakopaniṣatpramāṇasya ca bodhyabodhakabhāvaḥ || 28 ||

प्रयोजनं तु - तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावप्तिश्च "तरति शोकमात्मवित्" (छा उ ७ ।१ ।३) इत्यादिश्रुतेः "ब्रह्मविद् ब्रह्मैव भवति" (मुण्ड उ ३ ।२ ।९) इत्यादिश्रुतेश्च ॥ २९ ॥

prayojanaṁ tu tadaikyaprameyagatājñānanivṛttiḥ svasvarūpānandāvaptiśca "tarati śokamātmavit" (chā u 7|1|3) ityādiśruteḥ "brahmavid brahmaiva bhavati" (muṇḍa u 3|2|9) ityādiśruteśca || 29 ||

अयमधिकारी जननमरणादिसंसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" (मुण्ड उ १।२।१२) इत्यादिश्रुतेः ॥३० ॥

ayamadhikārī jananamaraṇādisaṁsārānalasantapto dīptaśirā jalarāśimivopahārapāṇiḥ śrotriyaṁ brahmaniṣṭhaṁ gurumupasṛtya tamanusarati "tadvijñānārthaṁ sa gurumevābhigacchet samitpāṇiḥ śrotriyaṁ brahmaniṣṭham" (muṇḍa u 1|2|12) ityādiśruteḥ ||30 ||

स गुरुः परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति

"तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ "
(मुण्ड उ १।२।१३) इत्यादिश्रुतेः ॥ ३१ ॥

sa guruḥ paramakṛpayādhyāropāpavādanyāyenainamupadiśati
"tasmai sa vidvānupasannāya samyak
praśāntacittāya śamānvitāya |
yenākṣaraṁ puruṣaṁ veda satyaṁ
provāca tāṁ tattvato brahmavidyām ||"
(muṇḍa u 1|2|13) ityādiśruteḥ || 31 ||

असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः -- अध्यारोपः ॥ ३२ ॥

asarpabhūtāyāṁ rajjau sarpāropavat vastuni avastvāropaḥ -- adhyāropaḥ | 32 |

वस्तु -- सच्चिदानन्दमद्वयं ब्रह्म अज्ञानादिसकलजडसमूहोऽवस्तु ॥ ३३ ॥

vastu -- saccidānandamadvayaṁ brahma ajñānādisakalajaḍasamūho'vastu | 33 |

अज्ञानं तु -- सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् "देवात्मशक्तिं स्वगुणैर्निगूढाम्" (श्वेत उ १.३) इत्यादिश्रुतेश्च ॥ ३४ ॥

ajñānaṁ tu -- sadasadbhyāmanirvacanīyaṁ triguṇātmakaṁ jñānavirodhi bhāvarūpaṁ yatkiñciditi vadantyahamajña ityādyanubhavāt "dehātmaśaktiṁ svaguṇairnigūḍhām" (śveta u 1.3) ityādiśruteśca || 34 ||

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते ॥ ३५ ॥

idamajñānaṁ samaṣṭivyaṣṭyabhiprāyeṇaikamanekamiti ca vyavahriyate || 35 ||

तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः "अजामेकां" (स्वे उ ४.५) इत्यादिश्रुतेः ॥ ३६ ॥

tathāhi yathā vṛkṣāṇāṁ samaṣṭyabhiprāyeṇa vanamityekatvavyapadeśo yathā vā jalānāṁ samaṣṭyabhiprāyeṇa jalāśaya iti tathā nānātvena pratibhāsamānānāṁ jīvagatājñānānāṁ samaṣṭyabhiprāyeṇa tadekatvavyapadeśaḥ "ajāmekāṁ" (sve u 4.5) ityādiśruteḥ || 36 ||

इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना ॥ ३७ ॥

iyaṁ samaṣṭirutkṛṣṭopādhitayā viśuddhasattvapradhānā || 37 ||

एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात्। "यः सर्वज्ञः सर्ववित्" (मुण्ड उ १।१।९) इति श्रुतेः ॥ ३८ ॥

etadupahitaṁ caitanyaṁ sarvajñatvasarveśvaratvasarvaniyantṛtvādi-guṇakamavyaktamantaryāmī jagatkāraṇamīśvara iti ca vyapadiśyate sakalājñānāvabhāsakatvāt | "yaḥ sarvajñaḥ sarvavit" (muṇḍa u 1.1.9) iti śruteḥ || 38 ||

ईश्वरस्येयं समष्टिरखिलकारणत्वात् कारणशरीरमानन्दप्रचुरत्वात् कोशवद् आच्छादकत्वाच्च आनन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति च उच्यते ॥ ३९ ॥

īśvarasyeyaṁ samaṣṭirakhilakāraṇatvāt kāraṇaśarīramānandapracuratvāt kośavad ācchādakatvācca ānandamayakośaḥ sarvoparamatvāt suṣuptirata eva sthūlasūkṣmaprapañcalayasthānamiti ca ucyate || 39 ||

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशो यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः "इन्द्रो मायाभिः पुरुरूप ईयते" (ऋग्वेद ६।४७।१८) इत्यादिश्रुतेः ॥ ४० ॥

yathā vanasya vyaṣṭyabhiprāyeṇa vṛkṣā ityanekatvavyapadeśo yathā vā jalāśayasya vyaṣṭyabhiprāyeṇa jalāniti tathājñānasya vyaṣṭyabhiprāyeṇa

tadanekatvavyapadeśaḥ "indro māyābhiḥ pururūpa īyate" (ṛgveda 6|47|18) ityādiśruteḥ || 40 ||

अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः ॥ ४१ ॥

atra vyastasamastavyāpitvena vyaṣṭisamaṣṭitāvyapadeśaḥ || 41 ||

इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना ॥ ४२ ॥

iyaṁ vyaṣṭirnikṛṣṭopādhitayā malinasattvapradhānā || 42 ||

एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यत एकाज्ञानावभासत्त्वात् ॥ ४३ ॥

etadupahitaṁ caitanyamalpajñatvānīśvaratvādiguṇakaṁ prājña ityucyata ekājñānāvabhāsaktvāt || 43 ||

अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात् ॥ ४४ ॥

asya prājñatvamaspaṣṭopādhitayānatiprakāśakatvāt || 44 ||

अस्यापीयमहङ्कारादिकारणत्वात्कारणशरीरमानन्दप्रचुरत्वात् कोशवद् आच्छादकत्वात् चानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानमिति च उच्यते ॥ ४५ ॥

asyāpīyamahaṅkārādikāraṇatvātkāraṇaśarīramānandapracuratvāt kośavad ācchādakatvāt cānandamayakośaḥ sarvoparamatvātsuṣuptirata eva sthūlasūkṣmaśarīraprapañcalayasthānamiti ca ucyate || 45 ||

तदानीमेताविश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवतः "आनन्दभुक् चेतोमुखः प्राज्ञः" (माण्डू उ ५) इति श्रुतेः सुखमहमस्वाप्सम् न किञ्चिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च ॥ ४६ ॥

tadānīmetāviśvaraprājñau caitanyapradīptābhiratisūkṣmābhirajñānavṛttibhiḥ ānandamanubhavataḥ "ānandabhuk cetomukhaḥ prājñaḥ" (māṇḍū u 5) iti śruteḥ sukhamahamasvāpsam na kiñcidavediṣamityutthitasya parāmarśopapatteśca || 46 ||

अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाभेदः ॥ ४७ ॥

anayoḥ samaṣṭivyaṣṭyorvanavṛkṣayoriva jalāśayajalayoriva vābhedaḥ || 47 ||

एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वाभेदः "एष सर्वेश्वर (एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्)" (माण्डू उ ६) इत्यादि श्रुतेः ॥ ४८ ॥

etadupahitayorīśvaraprājñayorapi vanavṛkṣāvacchinnākāśayoriva jalāśayajalagatapratibimbākāśayoriva vābhedaḥ "eṣa sarveśvara (eṣa sarvajña eṣo'ntaryāmyeṣa yoniḥ sarvasya prabhavāpyayau hi bhūtānām)" (māṇḍū u 6) ityādi śruteḥ || 48 ||

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते "(शान्तं) शिवमद्वैतं चतुर्थं मन्यते (स आत्मा स विज्ञेयः)" (माण्डू उ ७) इत्यादिश्रुतेः ॥ ४९ ॥

vanavṛkṣatadavacchinnākāśayorjalāśayajalatadgatapratibimbākāśayorvādhārabh ūtānupahitākāśavadanayorajñānatadupahitacaitanyayorādhārabhūtaṁ yadanupahitaṁ caitanyaṁ tatturīyamityucyate ‘(śāntaṁ) śivamadvaitaṁ caturthaṁ manyate (sa ātmā sa vijñeyaḥ)” (māṇḍū u 7) ityādiśruteḥ || 49 ||

इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्याम् तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ॥ ५० ॥

idameva turīyaṁ śuddhacaitanyamajñānāditadupahitacaitanyābhyām taptāyaḥpiṇḍavadaviviktaṁ sanmahāvākyasya vācyaṁ viviktaṁ sallakṣyamiti cocyate || 50 ||

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम् ॥ ५१ ॥

asyājñānasyāvaraṇavikṣepanāmakamasti śaktidvayam || 51 ||

आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलम् अवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नम् अप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। तदुक्तं -- “घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः। तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥” इति (हस्तामलकम् १०) ॥५२ ॥

āvaraṇaśaktistāvadalpo'pi megho'nekayojanāyatamādityamaṇḍalam avalokayitṛnayanapathapidhāyakatayā yathācchādayatīva tathājñānaṁ paricchinnam apyātmānam aparicchinnam asaṁsāriṇam avalokayitṛbuddhipidhāyakatayācchādayatīva tādṛśaṁ sāmarthyam | taduktaṁ-- “ghanacchannadṛṣṭirghanacchannamarkaṁ yathā manyate niṣprabhaṁ cātimūḍhaḥ | tathā baddhavadbhāti yo mūḍhadṛṣṭeḥ sa nityopalabdhisvarūpo'hamātmā ||” iti (hastāmalakam 10) ||52||

अनया आवृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसम्भावनापि भवति यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना ॥५३ ॥

anayā āvṛtasyātmanaḥ kartṛtvabhoktṛtvasukhitvaduḥkhitvādisaṁsārasambhāvanāpi bhavati yathā svājñānenāvṛtāyāṁ rajjvāṁ sarpatvasambhāvanā ||53||

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञान स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि स्वशक्त्याकाशादिप्रपञ्चमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तं -- "विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत् सृजेत्" इति (वाक्यसुधा १३) ॥५४ ॥

vikṣepaśaktistu yathā rajjvajñāna svāvṛtarajjau svaśaktyā sarpādikamudbhāvayatyevamajñānamapi svāvṛtātmani svaśaktyākāśādiprapañcamudbhāvayati tādṛśaṁ sāmarthyam | taduktaṁ— "vikṣepaśaktirliṅgādi brahmāṇḍāntaṁ jagat sṛjet" iti vākyasudhā 13 ||54||

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानञ्च भवति ॥५५ ॥

śaktidvayavadajñānopahitaṁ caitanyaṁ svapradhānatayā nimittaṁ svopādhipradhānatayopādānañca bhavati ||55||

यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादन्नञ्च भवति ॥५६ ॥

yathā lūtā tantukāryaṁ prati svapradhānatayā nimittaṁ svaśarīrapradhānatayopādannañca bhavati ||56||

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निः अग्नेरपोऽद्भ्यः पृथिवी चोत्पद्यते एतस्मादात्मन आकाशः सम्भूतः तै उ २।१।१ इत्यादिश्रुतेः ॥ ५७ ॥

tamaḥpradhānavikṣepaśaktimadajñānopahitacaitanyādākāśa ākāśādvāyurvāyooragniḥ agnerapo'dbhyaḥ pṛthivī cotpadyate etasmādātmana ākāśaḥ sambhūtaḥ tai u 2|1|1 ityādiśruteḥ || 57 ||

तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते ॥ ५८ ॥

teṣu jāḍyādhikyadarśanāttamaḥprādhānyaṁ tatkāraṇasya | tadānīṁ sattvarajastamāṁsi kāraṇaguṇaprakrameṇa teṣvākāśādiṣūtpadyante || 58 ||

एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते ॥ ५९ ॥

etānyeva sūkṣmabhūtāni tanmātrāṇyapañcīkṛtāni cocyante || 59 ||

एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ॥ ६० ॥

etebhyaḥ sūkṣmaśarīrāṇi sthūlabhūtāni cotpadyante || 60 ||

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि ॥ ६१ ॥

sūkṣmaśarīrāṇi saptadaśāvayavāni liṅgaśarīrāṇi || 61||

अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति ॥ ६२ ॥

avayavāstu jñānendriyapañcakaṁ buddhimanasī karmendriyapañcakaṁ vāyupañcakaṁ ceti || 62 ||

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ॥ ६३ ॥

jñānendriyāṇi śrotratvakcakṣurjihvāghrāṇākhyāni || 63 ||

एतान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते ॥ ६४ ॥

etānyākāśādīnāṁ sātvikāṁśebhyo vyastebhyaḥ pṛthak pṛthak krameṇotpadyante || 64 ||

बुद्धिर्नाम निश्चयात्मिकान्तःकरण्वृत्तिः ॥ ६५ ॥

buddhirnāma niścayātmikāntaḥkaraṇvṛttiḥ || 65 ||

मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरण्वृत्तिः ॥ ६६ ॥

mano nāma saṅkalpavikalpātmikāntaḥkaraṇvṛttiḥ || 66 ||

अनयोरेव चित्ताहङ्कारयोरन्तर्भावः ॥ ६७ ॥

anayoreva cittāhaṅkārayorantarbhāvaḥ || 67 ||

अनुसन्धानात्मिकान्तःकरणवृत्तिः चित्तम् ॥ ६८ ॥

anusandhānātmikāntaḥkaraṇavṛttiḥ cittam || 68 ||

अभिमानात्मिकान्तःकरणवृत्तिः अहङ्कारः ॥ ६९ ॥

abhimānātmikāntaḥkaraṇavṛttiḥ ahaṅkāraḥ || 69 ||

एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते ॥ ७० ॥

ete punarākāśādigatasāttivakāṁśebhyo militebhya utpadyante || 70 ||

एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् ॥ ७१ ॥

eteṣāṁ prakāśātmakatvātsāttvikāṁśakāryatvam || 71 ||

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति ॥ ७२ ॥

iyaṁ buddhirjñānendriyaiḥ sahitā vijñānamayakośo bhavati || 72 ||

अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी व्यवहारिको जीव इत्युच्यते ॥ ७३ ॥

ayaṁ kartṛtvabhoktṛtvasukhitvaduḥkhitvādyabhimānatvenehaloka-paralokagāmī vyavahāriko jīva ityucyate || 73 ||

मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति ॥ ७४ ॥

manastu jñānendriyaiḥ sahitaṁ sanmanomayakośo bhavati || 74 ||

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि ॥ ७५ ॥

karmendriyāṇi vākpāṇipādapāyūpasthākhyāni || 75 ||

एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते ॥ ७६ ॥

etāni punarākāaśādīnāṁ rajoṁśebhyo vyastebhyaḥ pṛthak pṛthak krameṇotpadyante || 76 ||

वायवः प्राणापानव्यानोदानसमानाः ॥ ७७ ॥

vāyavaḥ prāṇāpānavyānodānasamānāḥ || 77 ||

प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती ॥ ७८ ॥

prāṇo nāma prāggamanavānnāsāgrasthānavartī || 78 ||

अपानो नामावग्गमनवान्पाय्वादिस्थानवर्ती ॥ ७९ ॥

apāno nāmāvaggamanavānpāyvādisthānvartī || 79 ||

व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती ॥ ८० ॥

vyāno nāma viṣvaggamanavānakhilaśarīravartī || 80 ||

उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः ॥ ८१ ॥

udāno nāma kaṇṭhasthānīya ūrdhvagamanavānutkramaṇavāyuḥ || 81 ||

समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः ॥ ८२ ॥

samāno nāma śarīramadhyagatāśitapītānnādisamīkaraṇakaraḥ || 82 ||

समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणमिति यावत् ॥ ८३ ॥

samīkaraṇantu paripākakaraṇaṁ rasarudhiraśukrapurīṣādikaraṇamiti yāvat || 83 ||

केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति ॥ ८४ ॥

kecittu nāgakūrmakṛkaladevadattadhanañjayākhyāḥ pañcānye vāyavaḥ santīti vadanti || 84 ||

तत्र नाग उद्गिरणकरः। कूर्म उन्मीलनकरः। कृकलः क्षुत्करः। देवदत्तो जृम्भणकरः। घनञ्जयः पोषणकरः॥ ८५॥

tatra nāga udgiraṇakaraḥ | kūrma unmīlanakaraḥ | kṛkalaḥ kṣutkaraḥ | devadatto jṛmbhaṇakaraḥ | ghanañjayaḥ poṣaṇakaraḥ || 85 ||

एतेषां प्राणादिष्वन्तर्भावात्प्राणादयः पञ्चैवेति केचित्॥ ८६॥

eteṣāṁ prāṇādiṣvantarbhāvātprāṇādayaḥ pañcaiveti kecit || 86 ||

एतत्प्राणादिपञ्चकमाकाशादिगतरजोंशेभ्यो मिलितेभ्य उत्पद्यते॥ ८७॥

etatprāṇādipañcakamākāśādigatarajoṁśebhyo militebhya utpadyate || 87 ||

इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंशकार्यत्वम्॥ ८८॥

idaṁ prāṇādipañcakaṁ karmendriyaiḥ sahitaṁ satprāṇamayakośo bhavati | asya kriyātmakatvena rajoṁśakāryatvam || 88 ||

एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रियाशक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति। एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते॥ ८९॥

eteṣu kośeṣu madhye vijñānamayo jñānaśaktimān kartṛrūpaḥ | manomaya icchāśaktimān karaṇarūpaḥ | prāṇamayaḥ kriyāśaktimān kāryarūpaḥ | yogyatvādevameteṣāṁ vibhāga iti varṇayanti | etatkośatrayaṁ militaṁ satsūkṣmaśarīramityucyate || 89 ||

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्ज्लाशयवद्वा समिष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति ॥ ९० ॥

atrāpyakhilasūkṣmaśarīramekabuddhiviṣayatayā vanavajjlāśayavadvā samiṣṭiranekabuddhiviṣayatayā vṛkṣavajjalavadvā vyaṣṭirapi bhavati || 90 ||

एतत् समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च ॥ ९१ ॥

etat samaṣṭyupahitaṁ caitanyaṁ sūtrātmā hiraṇyagarbhaḥ prāṇaścetyucyate sarvatrānusyūtatvājjñānecchākriyāśaktimadupahitatvācca || 91 ||

अस्येषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते ॥ ९२ ॥

asyeṣā samaṣṭiḥ sthūlaprapañcāpekṣayā sūkṣmatvātsūkṣmaśarīraṁ vijñānamayādikośatrayaṁ jāgradvāsanāmayatvātsvapno'ta eva sthūlaprapañcalayasthānamiti cocyate || 92 ||

एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् ॥ ९३ ॥

etadvyaṣṭyupahitaṁ caitanyaṁ taijaso bhavati tejomayāntaḥkaraṇopahitatvāt || 93 ||

अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलशरीरलयस्थानमिति चोच्यते ॥ ९४ ॥

asyāpīyaṁ vyaṣṭiḥ sthūlaśarīrāpekṣayā sūkṣmatvāditi hetoreva sūkṣmaśarīraṁ vijñānamayādikośatrayaṁ jāgradvāsanāmayatvātsvapno'ta eva sthūlaśarīralayasthānamiti cocyate || 94 ||

एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः प्रविविक्तभुक्तैजसः (माण्डू ।उ ।३) इत्यादिश्रुतेः ॥ ९५ ॥

etau sūtrātmataijasau tadānīṁ manovṛttibhiḥ sūkṣmaviṣayānanubhavataḥ praviviktabhuktaijasaḥ māṇḍū|u|3 ityādiśruteḥ || 95 ||

अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाभेदः ॥ ९६ ॥

atrāpi samaṣṭivyaṣṭyostadupahitasūtrātmataijasayorvanavṛkṣavattadavac chinnākāśavacca jalāśayajalavattadgatapratibimbākāśavaccābhedaḥ || 96 ||

एवं सूक्ष्मशरीरोत्पत्तिः ॥ ९७ ॥

evaṁ sūkṣmaśarīrotpattiḥ || 97 ||

स्थूलभूतानि तु पञ्चीकृतानि ॥ ९८ ॥

sthūlabhūtānii tu pañcīkṛtāni || 98 ||

पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पञ्चभागान्प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु योजनम् ॥ ९९ ॥

pañcīkaraṇaṁ tvākāśādipañcasvekaikaṁ dvidhā samaṁ vibhajya teṣu daśasu bhāgeṣu prāthamikānpañcabhāgānpratyekaṁ caturdhā samaṁ vibhajya teṣāṁ caturṇāṁ bhāgānāṁ svasvadvitīyārdhabhāgaparityāgena bhāgāntareṣu yojanam || 99 ||

तदुक्तम् --

“द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।

स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्चते ॥ इति ॥” ॥ १०० ॥

taduktam --
“dvidhā vidhāya caikaikaṁ caturdhā prathamaṁ punaḥ |
svasvetaradvitīyāṁśairyojanātpañca pañcate ||” iti|| 100||

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् ॥ १०१ ॥

asyāprāmāṇyaṁ nāśaṅkanīyaṁ trivṛtkaraṇaśruteḥ
pañcīkaraṇasyāpyupalakṣaṇatvāt || 101 ||

पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशेष्यात्तु तद्वादस्तद्वादः (ब्रू सू २ ।४ ।२२)

इति न्यायेनाकाशादिव्यपदेशः सम्भवति ॥ १०२ ॥

pañcānāṁ pañcātmakatve samāne'pi teṣu ca vaiśeṣyāttu tadvādastadvādaḥ (brū
sū 2|4|22) iti nyāyenākāśādivyapadeśaḥ sambhavati || 102 ||

तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावग्नौ शब्दस्पर्शरूपाण्यप्सु

शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च ॥ १०३ ॥

tadānīmākāśe śabdo'bhivyajyate vāyau śabdasparśāvagnau
śabdasparśarūpāṇyapsu śabdasparśarūparasāḥ pṛthivyāṁ
śabdasparśarūparasagandhāśca || 103 ||

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपः--
सत्यमित्येतन्नामकानामुपर्युपरिविद्यमानानामतलवितलसुतलरसातलतलातल-
महातलपातालनामकानामधोऽधोविद्यनानानां लोकानां ब्रह्माण्डस्य
तदन्तर्गतचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति ॥ १०४ ॥

etebhyaḥ pañcīkṛtebhyo bhūtebhyo bhūrbhuvaḥsvarmaharjanastapaḥ satyamityetannāmakānāmuparyuparividyamānānāmatalavitalasutalarasātalatalātalamahātalapātālanāmakānāmadho'dhovidyanānānāṁ lokānāṁ brahmāṇḍasya tadantargatacaturvidhasthūlaśarīrāṇāṁ taducitānāmannapānādīnāṁ cotpattirbhavati || 104||

चतुर्विधशरीराणि तु जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि ॥ १०५ ॥

caturvidhaśarīrāṇi tu jarāyujāṇḍajasvedajodbhijjākhyāni || 105 ||

जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि ॥ १०६ ॥

jarāyujāni jarāyubhyo jātāni manuṣyapaśvādīni || 106 ||

अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि ॥ १०७ ॥

aṇḍajānyaṇḍebhyo jātāni pakṣipannagādīni || 107 ||

स्वेदजानि स्वेदेभ्यो जातानि यूकमशकादीनि ॥ १०८ ॥

svedajāni svedebhyo jātāni yūkamaśakādīni || 108 ||

उद्भिज्जानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि ॥ १०९ ॥

udbhijjāni bhūmimudbhidya jātāni latāvṛkṣādīni || 109 ||

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति ॥ ११० ॥

atrāpi caturvidhasakalasthūlaśarīramekānekabuddhiviṣayatayā vanavajjalāśayavadvā samaṣṭirvṛkṣavajjalavadvā vyaṣṭirapi bhavati || 110||

एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च ॥ १११ ॥

etatsamaṣṭyupahitaṁ caitanyaṁ vaiśvānaro virāḍityucyate sarvanarābhimānitvādvividhaṁ rājamānatvācca || 111 ||

अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते ॥ ११२ ॥

asyaiṣā samaṣṭiḥ sthūlaśarīramannavikāratvādannamayakośaḥ sthūlabhogāyatanatvācca sthūlaśarīraṁ jāgraditi ca vyapadiśyate || 112 ||

एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् ॥ ११३ ॥

etadvyaṣṭyupahitaṁ caitanyaṁ viśva ityucyate sūkṣmaśarīrābhimānamaparityajya sthūlaśarīrādipraviṣṭatvāt || 113 ||

अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते ॥ ११४ ॥

asyāpyeṣā vyaṣṭiḥ sthūlaśarīramannavikāratvādeva hetorannamayakośo jāgraditi cocyate || 114 ||

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैतांश्च सर्वानेतान् स्थूलविषयाननुभवतः जागरितस्थानो बहिःप्रज्ञः माण्डू उ ३ इत्यादिश्रुतेः ॥ ११५ ॥

tadānīmetau viśvavaiśvānarau digvātārkavaruṇāśvibhiḥ kramānniyantritena śrotrādīndriyapañcakena kramācchabdasparśarūparasagandhānagnīndropendrayamaprajāpatibhiḥ kramānniyantritena vāgādīndriayapañcakena kramādvacanādānagamanavisargānandāṁścandracaturmukhaśaṅkarācyutaiḥ kramānniyantritena manobuddhyahaṅkāaracittākhyenāntarindriyacatuṣkeṇa kramātsaṅkalpaniścayāhaṅkāryacaītāṁśca sarvānetān sthūlaviṣayānanubhavataḥ jāgaritasthāno bahiḥprajñaḥ māṇḍū u 3 ityādiśruteḥ || 115 ||

अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः ॥११६ ॥

atrāpyanayoḥ sthūlavyaṣṭisamaṣṭyostadupahitaviśvavaiśvānarayośca vanavṛkṣavattadavacchinnākāśavacca jalāśayajalavattadgatapratibimbākāśavacca pūrvavadabhedaḥ ||116 ||

एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ।११७ ॥

evaṁ pañcīkṛtapañcabhūtebhyaḥ sthūlaprapañcotpattiḥ |117 ||

एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान्प्रपञ्चो भवति यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वावान्तरजलाशयानां समष्टिरेको महान् जलाशयः ॥ ११८ ॥

eteṣāṁ sthūlasūkṣmakāraṇaprapañcānāmapi samaṣṭireko mahānprapañco bhavati yathāvāntaravanānāṁ samaṣṭirekaṁ mahadvanaṁ bhavati yathā vāvāntarajalāśayānāṁ samaṣṭireko mahān jalāśayaḥ || 118 ||

एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवद् अवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चैकमेव ॥ ११९ ॥

etadupahitaṁ vaiśvānarādīśvaraparyantaṁ caitanyamapyavāntaravanāvacchinnākāśavad avāntarajalāśayagatapratibimbākāśavaccaikameva || 119 ||

आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सदनुपहितं चैतन्यं "सर्वं खल्विदं ब्रह्म" (छा उ ३।१४।१) इति (महा) वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति ॥ १२० ॥

ābhyāṁ mahāprapañcatadupahitacaitanyābhyāṁ taptāyaḥpiṇḍavadaviviktaṁ sadanupahitaṁ caitanyaṁ "sarvaṁ khalvidaṁ brahma" ( chā u 3|14|1) iti (mahā) vākyasya vācyaṁ bhavati viviktaṁ sallakṣyamapi bhavati || 120 ||

एवं वस्त्न्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ॥ १२१ ॥

evaṁ vastnyavastvāropo'dhyāropaḥ sāmānyena pradarśitaḥ || 121 ||

## CHAPTER III
## THE JĪVA AND SUPERIMPOSITION

### THE CĀRVĀKAS

**Prayer**

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।

आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥

akhaṇḍaṁ saccidānandamavāṅmanasagocaram |
ātmānamakhilādhāramāśraye'bhīṣṭasiddhaye || 1 ||

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।

गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २ ॥

arthato'pyadvayānandānatītadvaitabhānataḥ |
gurūnārādhya vedāntasāraṁ vakṣye yathāmati || 2 ||

---

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते ॥ १२२ ॥

idānīṁ pratyagātmani idam idam ayam ayam āropayati iti viśeṣata ucyate || 122 ||

अतिप्राकृतस्तु "आत्मा वै जायते पुत्रः" इत्यादिश्रुतेः स्वस्मिन्निव पुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेवे पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ १२३ ॥

atiprākṛtastu ātmā vai jāyate putraḥ ityādiśruteḥ svasminniva putre'pi premadarśanātputre puṣṭe naṣṭe cāhameve puṣṭo naṣṭaścetyādyanubhavācca putra ātmeti vadati || 123 ||

चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमयः" (तै उ २।१।१) इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ १२४ ॥

cārvākastu "sa vā eṣa puruṣo'nnarasamayaḥ" (tai u 2|1|1) ityādiśruteḥ pradīptagṛhātsvaputraṁ parityajyāpi svasya nirgamadarśanātsthūlo'haṁ kṛśo'hamityādyanubhavācca sthūlaśarīramātmeti vadati || 124 ||

अपरश्चार्वाकः "ते ह प्राणाः प्रजापतिं पितरमेत्योचुः" (छा उ ५।१।७) इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात् काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति ॥ १२५ ॥

aparaścārvākaḥ "te ha prāṇāḥ prajāpatiṁ pitarametyocuḥ" (chāa u 5|1|7) ityādiśruterindriyāṇāmabhāve śarīracalanābhāvāt kāṇo'haṁ badhiro'hamityādyanubhavāccendriyāṇyātmeeti vadati || 125 ||

अपरश्चार्वकः "अन्योऽन्तर अत्मा प्राणमयः" (तै उ २।२।१) इत्यादिश्रुतेः प्राणाभाव इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावानित्यादि अनुभवाच्च प्राण आत्मेति वदति ॥ १२६ ॥

aparaścārvakaḥ "anyo'antara atmā prāṇamayaḥ" (tai u 2|2|1) ityādiśruteḥ prāṇābhāva indriyādicalanāyogādahamaśanāyāvānahaṁ pipāsāvānityādi anubhavācca prāṇa ātmeti vadati || 126 ||

अन्यस्तु चार्वाकः "अन्योऽन्तर अत्मा मनोमयः" (तै उ २।३।१) इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति ॥ १२७ ॥

anyastu cārvākaḥ "anyo'ntara atmā manomayaḥ" (tai u 2|3|1) ityādiśrutermanasi supte prāṇāderabhāvādahaṁ saṅkalpavānahaṁ vikalpavānityādyanubhavācca mana ātmeti vadati || 127 ||

## THE BUDDHISTS

बौद्धस्तु "अन्योऽन्तर आत्मा विज्ञानमयः" (तै उ २।४।१) इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति ॥ १२८ ॥

bauddhastu anyo'ntara ātmā vijñānamayaḥ tai u 2|4|1 ityādiśruteḥ karturabhāve karaṇasya śaktyabhāvādahaṁ kartāhaṁ bhoktetyādyanubhavācca buddhirātmeti badati || 128 ||

## MĪMĀṀSAKA VIEWS

प्राभाकरतार्किकौ तु "अन्योऽन्तर आत्मानन्दमयः" (तै उ २।५।१) इत्यादिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः ॥ १२९ ॥

prābhākaratārkikau tu anyo'ntara ātmānandamayaḥ tai u 2|5|1 ityādiśruterbuddhyādīnāmajñāne layadarśanādahamajño'ham ajñānītyādyanubhavācca ajñānamātmeti vadataḥ || 129 ||

भट्टस्तु "प्रज्ञानघन एवानन्दमयः" (माण्डू उ ५)1 इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति ॥ १३० ॥

bhaṭṭastu prajñānaghana evānandamayaḥ māṇḍū u 5 ityādiśruteḥ suṣuptau prakāśāprakāśasadbhāvānmāmahaṁ na jānāmītyādyanubhavāccājñānopahitaṁ caitanyamātmeti vadati || 130 ||

## THE ŚŪNYAVĀDINS

अपरे बौद्धः "असदेवेदमग्र आसीत्" (छा उ ६।२।१) इत्यादिश्रुतेः सुषुप्तौ सर्वाभावाद् अहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ १३१ ॥

apare bauddhaḥ asadevedamagra āsīt chā u 6|2|1 ityādiśruteḥ suṣuptau sarvābhāvādahaṁ suṣuptau nāsamityutthatasya svābhāvaparāmarśa-viṣayānubhavācca śūnyamātmeti vadati || 131 ||

## ESTABLISHEMENT OF THE TRUE NATURE OF THE SELF

एतेषां पुत्रादीनामनात्मत्वमुच्यते ॥ १३२ ॥

eteṣāṁ putrādīnāmanātmatvamucyate || 132 ||

एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानाम् उत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव ॥ १३३ ॥

etairatiprākṛtādivādibhirukteṣu śrutiyuktyanubhavābhāseṣu pūrvapūrvoktaśrutiyuktyanubhavābhāsānāmuttarottaraśrutiyuktyanubhavābhāsairātmatvabādhadarśanāt putrādīnāmanātmatvaṁ spaṣṭameva || 133 ||

किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव ॥ १३४ ॥

kiñca pratyagasthūlo'cakṣuraprāṇo'manā akartā caitanyaṁ cinmātraṁ sadityādiprabalaśrutivirodhādasya putrādiśūnyaparyantasya jaḍasya caitanyabhāsyatvena ghaṭādivadanityatvādahaṁ brahmeti vidvadanubhavaprābalyācca tattacchrutiyuktyanubhavābhāsānāṁ bādhitatbādapi putrādiśūnyaparyantamakhilamanātmaiva || 134 ||

अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक् चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः ॥ १३५ ॥

atastattadbhāsakaṁ nityaśuddhabuddhamuktasatyasvabhāvaṁ pratyak caitanyamevātmavastviti vedāntavidvadanubhavaḥ || 135 ||

एवमध्यारोपः ॥ १३६ ॥

evamadhyāropaḥ || 136 ||

## Chapter IV
## DE-SUPERIMPOSITION
### GOING BACK INTO THE FINAL CAUSE

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् ॥ १३७ ॥

apavādo nāma rajjuvivartasya sarpasya rajjumātratvavadvastuvivartasyāvastuno'jñānādeḥ prapañcasya vastumātratvam || 137 ||

तदुक्तम् --

"सत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः ॥" इति ॥ १३८ ॥

taduktam
"sattvato'nyathāprathā vikāra ityudīritaḥ |
atattvato'nyathāprathā vivarta ityudīritaḥ ||" iti || 138 ||

तथाहि एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनान्येतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति ॥ १३९ ॥

tathāhi etadbhogāyatanaṁ caturvidhasakalasthūlaśarīrajātaṁ bhogyarūpānnapānādikametadāyatanabhūtabhūrādicaturdaśabhuvanānyetadāy atanabhūtaṁ brahmāṇḍaṁ caitatsarvameteṣāṁ kāraṇarūpaṁ pañcīkṛtabhūtamātraṁ bhavati || 139 ||

एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति ॥ १४० ॥

etāni śabdādiviṣayasahitāni pañcīkṛtāni bhūtāni sūkṣmaśarīrajātaṁ caitatsarvameteṣāṁ kāraṇarūpāpañcīkṛtabhūtamātraṁ bhavati || 140 ||

एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहित-चैतन्यमात्रं भवति ॥ १४१ ॥

etāni sattvādiguṇasahitānyapañcīkṛtānyutpattivyutkrameṇa etatkāraṇabhūtājñānopahitacaitanyamātraṁ bhavati || 141 ||

एतदज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ॥ १४२ ॥

etadajñānamajñānopahitaṁ caitanyaṁ ceśvarādikametadādhārabhūtānupahitacaitanyarūpaṁ turīyaṁ brahmamātraṁ bhavati || 142 ||

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति ॥ १४३ ॥

ābhyāmadhyāropāpavādābhyāṁ tattvampadārthaśodhanamapi siddhaṁ bhavati || 143 ||

तथाहि--अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञादिविशिष्टं चैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति ॥ १४४ ॥

tathāhi--ajñānādisamaṣṭiretadupahitaṁ sarvajñādiviśiṣṭaṁ caitanyametadanupahitaṁ caitattrayaṁ taptāyaḥpiṇḍavadekatvena avabhāsamānaṁ tatpadavācyārtho bhavati || 144 ||

एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति ॥ १४५ ॥

etadupādhyupahitādhārabhūtamanupahitaṁ caitanyaṁ tatpadalakṣyārtho bhavati || 145 ||

अज्ञानादिव्यष्टिरेतदुपहिताल्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति ॥ १४६ ॥

ajñānādivyaṣṭiretadupahitālpajñatvādiviśiṣṭacaitanyametadanupahitaṁ caitattrayaṁ taptāyaḥpiṇḍavadekatvenāvabhāsamānaṁ tvampadavācyārtho bhavati || 146 ||

एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ॥ १४७ ॥

etadupādhyupahitādhārabhūtamanupahitaṁ pratyagānandaṁ turīyaṁ caitanyaṁ tvampadalakṣyārtho bhavati || 147 |

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति ॥ १४८ ॥

atha mahāvākyārtho varṇyate | idaṁ tattvamasivākyaṁ sambandhatrayeṇākhaṇḍārthabodhakaṁ bhavati || 148 ||

सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति ॥ १४९ ॥

sambandhatrayaṁ nāma padayoḥ sāmānādhikaraṇyaṁ padārthayorviśeṣaṇaviśeṣyabhāvaḥ pratyagātmalakṣaṇayorlakṣyalakṣaṇabhāvaśceti || 149 ||

तदुक्तम् --

"सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥ " इति ॥ १५० ॥

Taduktam--

"sāmānādhikaraṇyaṁ ca viśeṣaṇaviśeṣyatā |
lakṣyalakṣaṇasambandhaḥ padārthapratyagātmanām ||" iti || 150 ||

सामानाधिकरण्यसम्बन्धस्तावद्यथा सोऽयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्पर्यसम्बन्धः । तथा च तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्य अपरोक्षत्वादिविशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः ॥ १५१ ॥

sāmānādhikaraṇyasambandhastāvadyathā so'yaṁ devadatta ityasminvākye tatkālaviśiṣṭadevadattavācakasaśabdasya etatkālaviśiṣṭa-devadattavācakāyaṁśabdasya caikasminpiṇḍe tātparyasambandhaḥ | tathā ca tattvamasīti vākye'pi parokṣatvādiviśiṣṭacaitanyavācakatatpadasya aparokṣatvādiviśiṣṭacaitanyavācakatvampadasya caikasmiṁścaitanye tātparyasambandhaḥ || 151 ||

विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्य अयंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः। तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैन्तन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकत्या विशेषणविशेष्यभावः॥ १५२॥

viśeṣaṇaviśeṣyabhāvasambandhastu yathā tatraiva vākye saśabdārthatatkālaviśiṣṭadevadattasyāyaṁśabdārthaitatkālaviśiṣṭadevadattasya cānyonyabhedavyāvartaktayā viśeṣaṇaviśeṣyabhāvaḥ | tathātrāpi vākye tatpadārthaparokṣatvādiviśiṣṭacaintanyasya tvampadārthāparokṣatvādiviśiṣṭa-caitanyasya cānyonyabhedavyāvartakatyā viśeṣaṇaviśeṣyabhāvaḥ || 152 ||

लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादि-विशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः॥ १५३॥

lakṣyalakṣaṇasambandhastu yathā tatraiva saśabdāyaṁśabdayos tadarthayorvā viruddhatatkālaitatkālaviśiṣṭatvaparityāgena aviruddhadevadattena saha lakṣyalakṣaṇabhāvaḥ | tathātrāpi vākye tattvampadayostadarthayorvā viruddhaparokṣatvāparokṣatvādiviśiṣṭatva-parityāgenāviruddhacaitanyena saha lakṣyalakṣaṇabhāvaḥ || 153 ||

इयमेव भागलक्षणेत्युच्यते॥ १५४॥

iyameva bhāgalakṣaṇetyucyate || 154 ||

अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते ॥ १५५ ॥

asminvākye nīlamutpalamiti vākyavadvākyārtho na saṅgacchate || 155 ||

तत्र तु नीलपदार्थनीलगुणस्य उत्पलपदार्थोत्पलद्रव्यस्य च शौकल्यपटादिभेदव्यावर्तकतया अन्योन्यविशेषणविशेष्यरूपसंसर्गस्य अन्यतरविशिष्टस्य अन्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात् तद्वाक्यार्थः सङ्गच्छते ॥ १५६ ॥

tatra tu nīlapadārthanīlaguṇasya utpalapadārthotpaladravyasya ca śaukalyapaṭādibhedavyāvartakatayā anyonyaviśeṣaṇaviśeṣyarūpasaṁsargasya anyataraviśiṣṭasya anyatarasya tadaikyasya vā vākyārthatvāṅgīkāre pramāṇāntaravirodhābhāvāt tadvākyārthaḥ saṅgacchate || 156 ||

अत्र तु तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य च अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्य अन्यतरविशिष्टस्य अन्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यर्थो न संगच्छते ॥ १५७ ॥

atra tu tatpadārthaparokṣatvādiviśiṣṭacaitanyasya tvampadārthāparokṣatvādiviśiṣṭacaitanyasya ca anyonyabhedavyāvartakatayā viśeṣaṇaviśeṣyabhāvasaṁsargasya anyataraviśiṣṭasya anyatarasya tadaikyasya vā vākyārthatvāṅgīkāre pratyakṣādipramāṇavirodhādvākyartho na saṁgacchate || 157 ||

तदुक्तं --

“संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।

अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥” इति (पञ्चदशी ७।७५) ॥ १५८ ॥ ॥

taduktaṁ

“saṁsargo vā viśiṣṭo vā vākyārtho nātra sammataḥ |

akhaṇḍaikarasatvena vākyārtho viduṣāṁ mataḥ ||” iti (pañcadaśī 7|75) || 158 ||

अत्र गङ्गायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणापि न संगच्छते ॥ १५९ ॥

atra gaṅgāyāṁ ghooṣaḥ prativasatītivākyavajjahallakṣaṇāpi na saṅgacchate || 159 ||

तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते ॥ १६१ ॥

tatra tu gaṅgāghoṣayorādhārādheyabhāvalakṣaṇasya vākyārthasyāśeṣato viruddhatvādvākyārthamaśeṣataḥ parityajya tatsambandhitīralakṣaṇāyā yuktatvājjahallakṣaṇā saṅgacchate || 161 ||

अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते ॥ १६१ ॥

atra tu parokṣāparokṣacaitanyaikatvalakṣaṇasya vākyārthasya bhāgamātre virodhādbhāgāntaramapi parityajyānyalakṣaṇāyā ayuktatvājjahallakṣaṇā na saṅgacchate || 161 ||

न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयत्वतः कुतो जहल्लक्षणा न सङ्गच्छत इति वाच्यम् ॥ १६२ ॥

na ca gaṅgāpadaṁ svārthaparityāagena tīrapadārthaṁ yathā lakṣayati tathā tatpadaṁ tvampadaṁ vā svārthaparityāgena tvampadārthaṁ tatpadārthaṁ vā lakṣayatvataḥ kuto jahallakṣaṇā na saṅgacchata iti vācyam || 162 ||

तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतर-पदार्थप्रतीत्यपेक्षाभावात् ॥ १६३ ॥

tatra tīrapadāśravaṇena tadarthāpratītau lakṣaṇayā tatpratītyapekṣāyāmapi tattvampadayoḥ śrūyamāṇatvena tadarthapratītau lakṣaṇayā punaranyatarapadenānyatarapadārthapratītyapekṣābhāvāt || 163 ||

अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणापि न सम्भवति ॥ १६४ ॥

atra śoṇo dhāvatītivākyavadajahallakṣaṇāpi na sambhavati || 164 ||

तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति ॥ १६५ ॥

tatra śoṇaguṇagamanalakṣaṇasya vākyārthasya viruddhatvāttadaparityāgena tadāśrayāśvādilakṣaṇayā tadvirodhaparihārasambhavādajahallakṣaṇā sambhavati || 165 ||

अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवादजल्लक्षणा न सम्भवत्येव ॥ १६६ ॥

atra tu parokṣatvāparokṣatvādiviśiṣṭacaitanyaikatvasya vākyārthasya viruddhatvāttadaparityāgena tatsambandhino yasya kasyacidarthasya lakṣitatve'pi tadvirodhaparihārāsambhavādajallakṣaṇā na sambhavatyeva || 166 ||

न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वम्पदार्थं तत्पदर्थं वा लक्षयत्वतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम् ॥ १६७ ॥

na ca tatpadaṁ tvampadaṁ vā svārthaviruddhāṁśaparityāgena aṁśāntarasahitaṁ tvampadārthaṁ tatpadarthaṁ vā lakṣayatvataḥ kathaṁ prakārāntareṇa bhāgalakṣaṇāṅgīkaraṇamiti vācyam || 167 ||

एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च ॥ १६८ ॥

ekena padena svārthāṁśapadārthāntarobhayalakṣaṇāyā asambhavātpadāntareṇa tadarthapratītau lakṣaṇayā punastatpratītyapekṣābhāvācca || 168 ||

तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्ट-देवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्याविरुद्धं देवदतांशमात्रं लक्षयति तथा तत्त्वमसीतिवाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्ट-चैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद् विरुद्धपरोक्षत्वापरोक्षत्वविशिष्टांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ॥ १६९ ॥

tasmādyathā so'yaṁ devadatta iti vākyaṁ tadartho vā tatkālaitatkālaviśiṣṭa- devadattalakṣaṇasya vākyārthasyāṁśe virodhād viruddhatatkālaitatkāla-viśiṣṭāṁśaṁ parityajyāviruddhaṁ devadatāṁśamātraṁ lakṣayati tathā tattvamasītivākyaṁ tadartho vā parokṣatvāparokṣatvādiviśiṣṭacaitanya-aikatvalakṣaṇasya vākyārthasyāṁśe virodhād viruddhaparokṣatvāparokṣatva- viśiṣṭāṁśaṁ parityajyāviruddhamakhaṇḍacaitanyamātraṁ lakṣayatīti || 169 ||

## THE MEANING OF "I AM BRAHMAN"

अथाधुनाहं ब्रह्मास्मि (बृ उ १।४।१०) इत्यनुभववाक्यार्थो वर्ण्यते ॥ १७० ॥

athādhunāhaṁ brahmāsmi (bṛ u 1|4|10) ityanubhavavākyārtho varṇyate || 170 ||

एवमाचार्येणाध्यारोपापावादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यसुद्धवुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति ॥ १७१ ॥

evamācāryeṇādhyāropāpāvādapuraḥsaraṁ tattvampadārthau śodhayitvā vākyenākhaṇḍārthe'vabodhite'dhikāriṇo'haṁ nityasuddhavuddhamuktasatyasvabhāvaparamānandānantādvayaṁ brahmāsmītyakhaṇḍākārākāritā cittavṛttirudeti || 171 ||

सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परंब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति ॥ १७२ ॥

sā tu citpratibimbasahitā satī pratyagabhinnamajñātaṁ parambrahma viṣayīkṛtya tadgatājñānameva bādhate tadā paṭakāraṇatantudāhe paṭadāhavadakhilakāraṇe'jñāne bādhite sati tatkāryasyākhilasya bādhitatvāttadantarbhūtākhaṇḍākārākāritā cittavṛtirapi bādhitā bhavati || 172 ||

तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति ॥ १७३ ॥

tatra pratibimbitaṁ caitanyamapi yathā dīpaprabhādityaprabhāva-bhāsanāsamarthā satī tayābhibhūtā bhavati tathā svayamprakāśamānapratyag-abhinnaparabrahmāvabhāsanānarhatayā tenābhibhūtaṁ sat svopādhibhūtākhaṇḍavṛtterbādhitatvāddarpaṇābhāve mukhapratibimbasya mukhamātratvavatpratyagabhinnaparabrahmamātraṁ bhavati || 173 ||

एवं च सति “मनसैवानुद्रष्टव्यं” ( बृ उ ४ ।४ ।१९) “यन्मनसा न मनुते” (के उ १ ।५ ) इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् ॥ १७४ ॥

evaṁ ca sati “manasaivānudraṣṭavyaṁ” (bṛ u 4|4|19) “yanmanasā na manute” (ke u 1|5) ityanayoḥ śrutyoravirodho vṛttivyāpyatvāṅgīkāreṇa phalavyāpyatvapratiṣedhapratipādanāt || 174 ||

तदुक्तं -

“फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निबारितम्।

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥” इति

( पंचदशी ६।९०)  ॥ १७५ ॥

Taduktaṁ
“phalavyāpyatvamevāsya śāstrakṛdbhirnibāritam |
brahmaṇyajñānanāśāya vṛttivyāptirapekṣitā ||” iti
(pañcadaśī 6|90) || 175 ||

“स्वयम्प्रकाशमानत्वान्नाभास उपयुज्यते। ” इति च ( पंचदशी ६।९२) ॥ १७३ ॥

“svayamprakāśamānatvānnābhāsa upayujyate |” iti ca (pañcadaśī 6|92) || 173 ||

जदपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति ॥ १७७ ॥

jadapadārthākārākāritacittavṛtterviśeṣo'sti || 177 ||

तथाहि। अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य

तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति ॥ १७८ ॥

tathāhi | ayaṁ ghaṭa iti ghaṭākārākāritacittavṛttirajñāataṁ ghaṭaṁ viṣayīkṛtya tadgatājñānanirasanapuraḥsaraṁ svagatacidābhāsena jaḍaṁ ghaṭamapi bhāsayati || 178 ||

तदुक्तं -

“बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्।

तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥ ”  इति

( पंचदशी ७।९१) ॥ १७९ ॥

taduktaṁ -
“buddhitatsthacidābhāsau dvāvapi vyāpnuto ghaṭam |
tatrājñānaṁ dhiyā naśyedābhāsena ghaṭaḥ sphuret ||” iti
(pañcadaśī 7|91) || 179 ||

यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति ॥ १८० ॥

yathā dīpaprabhāmaṇḍalamandhakāragataṁ ghaṭapaṭādikaṁ viṣayīkṛtya tadgatāndhakāranirasanapuraḥsaraṁ svaprabhayā tadapi bhāsayatīti || 180 ||